समय–3 घंटा

# त्रैमासिक परीक्षा 2023–24

कक्षा–10वी

विषय–संस्कृत

(कुल प्रश्नों की संख्या : 23)

पूर्णांक–75

निर्देशाः–

1. सर्वे प्रश्नाः अनिवार्याः सन्ति।
2. प्रश्नानां सम्मुखे अंकाः प्रदत्ताः।
3. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेनैव लेखनीयानि।

**प्र.1. उचितं विकल्पं चित्वा लिखत –** (1 x 6 = 6)

(i) स्त्रीलिंग–शब्दरूपं न अस्ति ?

अ) रमा ब) सीता स) रामः द) बालिका

(ii) "रामैः" इत्यस्मिन् पदे विभक्तिः वचनं च अस्ति ?

अ) द्वितीया बहुवचनम् ब) तृतीया बहुवचनम्

स) चतुर्थी बहुवचनम् द) षष्टी द्विवचनम्

(iii) फलशब्दस्य द्वितीया विभक्तेः बहुवचनम् अस्ति ?

अ) फलम् ब) फलानि स) फले द) फलाय

(iv) बालकः शब्दस्य षष्ठी विभक्तेः एकवचनं रूपं भविष्यति ?

अ) बालकस्य ब) बालकेन स) बालकम् द) बालके

(v) अधोलिखितेषु अव्ययपदं न अस्ति ?

अ) अत्र ब) एव स) अधुना द) मण्डलम्

(vi) अधोलिखितेषु अव्ययपदम् अस्ति ?

अ) एव ब) गृहम् स) नगरम् द) ग्रामम्

**प्र.2 कोष्ठकात् चित्वा रिक्तस्थानानि पूरयत –** (1 x 6 = 6)

(i) भूतकाले ................................ लकारः भवति। ( लट् / लङ् )

(ii) लङ्लकारस्य उदाहरणम् ...................... अस्ति। ( अपठत् / पठन्ति )

(iii) लट् लकारस्य उदाहरणम् .................... अस्ति। ( पठिष्यति / पठति )

(iv) गम् धातोः रूपम् ................................ भवति। ( गच्छति / वदति )

(v) "निर्वासिता" पदे ................................ उपसर्गः अस्ति। ( निर् / वासिता )

(vi) प्र उपसर्गस्य उदाहरणम् .................... अस्ति। ( प्रहारः / प्रकाशः )

**प्र.3. शुद्ध वाक्यानां समक्षम् "आम्" अशुद्ध वाक्यानां समक्षं 'न' इति लिखत–** (1 x 6 = 6)

(i) सूर्योदयः शब्दस्य विच्छेदं सूर्य+उदयः न अस्ति ?

(ii) विद्यालयः इत्यस्मिन् पदे दीर्घसन्धिः अस्ति ?

(iii) "इति+उक्त्वा" सन्धियुक्तपदं इत्युक्त्वा भवति ?

(iv) "पंचगंगम्" द्विगु समासस्य उदाहरणम् अस्ति ?

(v) उपगंगम् द्विगु समासस्य उदाहरणम् अस्ति ?

(vi) "यथाशक्ति" अव्ययी भाव समासस्य उदाहरणम् अस्ति ?

https://www.mpboardonline.com

प्र.4. उचिततयुग्म मेलनं कुरुत – (1 x 6 = 6)

| | | | |
|---|---|---|---|
| (i) | बालक + टाप् | क) | भूमौ |
| (ii) | क्रीड् + तुमुन् | ख) | रामम् |
| (iii) | गम् + क्त्वा | ग) | गहनकानने |
| (iv) | वृषभः कुत्र पपात | घ) | गत्वा |
| (v) | कुशलवौ कम् उपसृत्य प्रणमतः | ड़) | क्रीडितुम् |
| (vi) | बुद्धिमती कुत्र व्याघ्रं ददर्श | च) | बालिका |

प्र.5. एकपदेन उत्तरं लिखत् – (1 x 6 = 6)

(i) "अतिदीर्घः प्रवासः" पदे विशेष्यपदम् अस्ति ?
(ii) "जननी तुल्यवत्सला" पदे विशेषणपदं अस्ति ?
(iii) "वनम्" शब्दस्य पर्यायशब्दं अस्ति ?
(iv) "पत्नी" शब्दस्य पर्यायपदम् अस्ति ?
(v) "मूर्खः" इति पदस्य विलोम पदं लिखत।
(vi) "संपत्तौ" शब्दस्य विलोमपदम् अस्ति ?

प्र.6. केन समः बन्धुः नास्ति ? 2

अथवा

कविः कुत्र संचरणं कर्तुम् इच्छति ?

प्र.7. बुद्धिमती केन उपेता पितुर्गृहं प्रति चलिता ? 2

अथवा

माता सुरभिः किमर्थम् अश्रूणि मुंचति स्म ?

प्र.8. बालभावात् हिमकरः कुत्र विराजते ? 2

अथवा

व्याघ्रः किं विचार्य पलायितः ?

प्र.9. कविः किमर्थं प्रकृतेः शरणम् इच्छति ? 2

अथवा

वसन्तस्य गुणं कः जानाति ?

प्र.10. कृषकः किं करोति स्म ? 2

अथवा

बुद्धिमती केन उपेता पितुर्गृहं प्रति चलिता ?

प्र.11. रेखांकितपदं स्वीकृत्य प्रश्न–निर्माणं कुरुत (कोऽपि द्वौ)– (1 x 1 = 2)

(i) बुद्धिमती <u>चपेटया</u> पुत्रौ प्रहृतवती। (ii) <u>सुराधिपः</u> ताम् अपृच्छत।
(iii) त्वं <u>मानुषात्</u> बिभेषि।

प्र.12. अधोलिखितानां वाक्यानि कः कं प्रति कथयति (कोऽपि द्वौ)– (1 x 1 = 2)

(i) सव्यवधानं न चारित्र्यलोपाय। (ii) जानाम्यहं तस्य नामधेयम्।
(iii) तस्य द्वे नाम्नी।

https://www.mpboardonline.com

प्र.13. प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्य-
पुस्तकात् सुभाषितम् एकम् लिखत- 2

प्र.14. अधोलिखितेषु अशुद्ध वाक्येषु शुद्धिं कुरूत-(कोऽपि द्वौ) 2

(i) रामम् नमः।
(ii) बालकः विद्यालयात् गृहं गच्छन्ति।
(iii) अहम् पुस्तकं पठति।

प्र.15. पाठगतशब्दैः रिक्तस्थान-पूर्तिं कुरूत-(कोऽपि चत्वारः) ½ x 4 = 2

( एव, सदा, भूषम्, महावृक्षः, शत्रुः, गुणं )

(i) गुणी .................................. जनाति।
(ii) सेवितव्यो.............................. फलच्छायासमन्वितः।
(iii) क्रोधो हि ............................ प्रथमो नराणाम्।
(iv) इदानीं वायुमण्डलं .................. प्रदूषितमस्ति।
(v) पर्यावरणस्य संरक्षणम् .................. प्रकृतेः आराधना।
(vi) .................................. समयस्य सदुपयोगः करणीयः।

प्र.16. प्रदत्तवाक्यैः घटनाक्रमानुसारं लिखत - ½ x 4 = 2

(i) गलबद्ध श्रृगालकः व्याघ्रः पुनः पलायितः।
(ii) 'त्वं व्याघ्रत्रयम् आनेतुं प्रतिज्ञाय एकमेव आनीतवान्।
(iii) जम्बुक कृतोत्साहः व्याघ्रः पुनः काननम् आगच्छत्।
(iv) प्रत्युत्पन्नमतिः सा श्रृगालम् आक्षिपन्ती उवाच।

प्र.17. निर्देशानुसारं वाच्य-परिवर्तनं कुरूत- (कोऽपि द्वौ) (1 x 1 = 2)

(i) मया विद्यालयं गम्यते (कर्तृवाच्य)
(ii) बालिका फलं खादति (कर्मवाच्य)
(iii) मोहनः पुस्तकं पठति (कर्मवाच्य)

प्र.18. अधोलिखितं गद्यांशं पठित्वा प्रश्नानां उत्तराणि संस्कृत-भाषायाम् लिखत- 3

कश्चित् कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन्नासीत्। तयोः बलीवर्दयोः एकः शरीरेण दुर्बलः जवेन गन्तुम् अशक्तश्चासीत्। अतः कृषकः तं दुर्बलं वृषभं तोदनेन नुदन् अवर्तत। सः ऋषभः हलमूढ्वा गन्तुमशक्तः क्षेत्रे पपात।

(i) कृषकः काभ्याम् क्षेत्रकर्षणं कुर्वन्नासीत्।
(ii) सः ऋषभः कथं क्षेत्रे पपात।
(iii) "गन्तुम्" इति पदे कः प्रत्ययः अस्ति। **अथवा**

https://www.mpboardonline.com

भो वासव। पुत्रस्य दैन्यं दृष्ट्वा अहं रोदिमि। सः दीन इति जानन्नपि कृषकः तं बहुधा पीडयति। सः कृच्छ्रेण भारमुद्वहति। इतरमिव धुरं वोढुं सः न शक्नोति। एतत् भवान् पश्यति न? इति प्रत्यवोचत्।

(i) सः कथं भारम् उद्वहति ?

(ii) इतरमिव धुरं वोढुं कः न शक्नोति ?

(iii) "पश्यति" इत्यस्मिन् पदे कः धातुः अस्ति ?

प्र.19. अधोलिखितं पद्यांशाधारितं प्रश्नानां उत्तराणि संस्कृतभाषायां लिखत– 3

उदीरितोऽर्थः पशुनापि गृह्यते,
हयाश्च नागाश्च वहन्ति बोधिताः।
अनुक्तमप्यूहति पण्डितो जनः
परेङ्गितज्ञानफला हि बुद्धयः।।

(i) पशुना अपि कीदृशः गृह्यते ?

(ii) बुद्धयः कीदृश्यः भवन्ति ?

(iii) "पशुनापि" पदे सन्धिः अस्ति ?

**अथवा**

प्रस्तरतले लतातरुगुल्मा नो भवन्तु पिष्टाः। पाषाणी सभ्यता निसर्गे स्यान्न समाविष्टा।।
मानवाय जीवनं कामये नो जीवन्मरणम्।

(i) अन्तिमे पद्यांशे कवेः का कामना अस्ति ?

(ii) पाषाणीसभ्यतायां के प्रस्तरतले पिष्टाः सन्ति ?

(iii) मानवाय पदे कः विभक्तिः वचनम् अस्ति ?

प्र.20. अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृत भाषायाम् लिखत– 3

उभौ– (अनिच्छां नाटयतः) राजन्।
अलमतिदाक्षिण्येन।
रामः– अलमतिशालीनतया। भवति शिशुजनो वयोऽनुरोधाद्
गुणमहतामपि लालनीय एव। व्रजति हिमकरोऽपि बालभावात्
पशुपतिमस्तक– केतकच्छदत्वम्।।

अनिच्छां के नाटयतः ?

लालनीयः वयोऽनुरोधात् कः भवति ?

(i) हिमकरः बालभावात् कुत्र विराजते ?

**अथवा**

https://www.mpboardonline.com

(ii) रामः– वयस्य, अपूर्वं खलु नामधेयम्।

(iii) विदूषकः– (विचिन्त्य) एवं तावत् पृच्छामि। निरनुक्रोश इति क एवं भणति ?

(i) कशः– अम्बा

(ii) विदूषकः– किं कुपिता एवं भणति, उत प्रकृतिस्था ?

'निरनुक्रोश इति क एवं भणति' इति कः वदति ?

'किं कुपिता एवं भणति उत प्रकृतिस्था'–अस्मात् व्याक्यात् 'हर्षिता' इति पदस्य विपरीतार्थकपदम् अस्ति ?

(iii) 'पृच्छामि' पदे पुरुषं वचनं च अस्ति ?

प्र.21. अधोलिखितं अपठित–गद्यांशं पठित्वा प्रश्नानां उत्तराणि संस्कृतेनैव लिखत– 4

कुण्डलः कश्चन् सदाचारी वृद्धः ब्राहणः। सः वेदशास्त्रज्ञः आसीत्। कुण्डलस्य पुत्रः सुकर्मा महान् पितृभक्तः। सः पितुः सकाशादेव वेदशास्त्रयोः अध्ययनं करोति स्म। श्रद्धया मातुः पितृश्च सेवां करोति स्म सुकर्मा 'मातृदेवो भव' 'पितृदेयो भव' इति वचन् अव्यवधानेन पालयति स्म।

(i) सः वेदशास्त्रज्ञः कः आसीत् ?

(ii) कुण्डुलपुत्रस्य किं नाम अस्ति ?

(iii) महान् पितृभक्तः कः आसीत् ?

(iv) सुकर्मा किं वचनम् अव्यवधानेन पालयति स्म।

22. स्वप्राचार्यस्य कृते अवकाशार्थं प्रार्थना पत्रं लिखत। 4

**अथवा**

पितरं प्रति परीक्षायाः परिणामसूचकं पत्रं लिखत।

1.23. अधोलिखितेषु एकं विषयं स्वीकृत्य विंशत्याधिक शतशब्देषु (120) संस्कृत भाषायां निबन्धं लिखत। 4

(i) सफल–तृतीयचन्द्रयानम्

(ii) संस्कृतभाषायाः महत्वम्

(iii) पर्यावरणम्

(iv) अस्माकं भारतदेशः

https://www.mpboardonline.com
Whatsapp @ 9300930012
Send your old paper & get 10/-
अपने पुराने पेपर्स भेजे और 10 रुपये पायें,
Paytm or Google Pay से

https://www.mpboardonline.com